International Journal of Sanskrit Research 2020; 6(4): 17-19

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(4): 17-19
© 2020 IJSR
www.anantaajournal.com
Received: 12-05-2020
Accepted: 13-06-2020

**सुलग्ना लेङ्का**
आचार्यद्वितीयवर्षम्, राष्ट्रियसंस्कृतसंस्थानम्
श्रीसदाशिवपरिसरः, पुरी, ओडिशा, भारत

# शब्दनित्यत्ववादः

## सुलग्ना लेङ्का

### उपक्रम

संस्कृतभाषायाः पदसाधुत्वप्रतिपादनाय व्याकरणमेव मौलिकसाधनं प्रतिभाति । वाक्यपदीये भर्त्तृहरिणा समुलिखितं यत्- [१]

“न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते
अनुविद्धमिव ज्ञानं सर्वं अब्देन भासते”।।

अत्र सर्वमेव ज्ञानं शब्दमयत्वात् भाषामन्तरा ज्ञानप्रकाशप्रक्रिया नितरामसम्भवा इति । स्वादिगणीय भाष्-व्यक्तायां वाचि धातोः निष्पन्नोऽयं भाषाशब्दः, तेन भाष्यते अभिव्यज्यते वाक्रूपेण इति भाषा । भाषा हि सक्तू इव तितउ द्वारा यथा परिस्कृता क्रियते तथा वाचः शुद्धत्वं व्याकरणेन विधीयते । ऋग्वेदः व्रवीति -[२] ”सक्तू इव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रतह्ल । शतपथब्राह्मणेऽपि भाषा विश्वरूपा इति वक्तुम् - [३]”वागैव विराट्ह्ल इति उल्लिखितः । पाणिनीय व्याकरणानु -सारेण शब्दाऽर्थश्च नित्यौ, अनयोश्च ज्ञानं लोकाधीनम् । अत्र प्रमाणं ”सिद्धे शब्दार्थसम्वन्धेह्ल इति वार्त्तकम् । भाष्यकारोऽपि शब्दार्थौ नित्याविति मत्वा तयोर्ज्ञानं लोकत एव दर्शयति । तथाहि भाष्ये – कथं पुनर्ज्ञायते सिद्धः शब्दोऽर्थः सम्वन्धश्चेति इत्यत्र लोकतः इति समाधानम् । यल्लोकेऽर्थमर्थमुपादाय शब्दान् प्रयुङ्क्ते । तेषां निवृत्तौ यत्नं कुर्वन्ति इति । काशिकावृत्तिरपि भाष्योक्तमतं समर्थयति- अन्य इति शास्त्रापेक्षया लोको व्यपदिश्यते । शब्दैरर्थाभिधानं स्वाभाविकं न पारिभाषिकमशक्यत्वात् । लोकतः एवार्थावगतेः इति ।

### प्रस्तावना

शब्दस्य नित्यत्वसाधने शब्दतत्वस्य विवेचनमपरिहार्यम् । सर्वेषां विषयाणां स्थितिप्रवृत्तिनिवृत्तिनिमित्तं शब्दस्य प्रयोगिकत्वं ग्राह्यम् । शब्दप्रयोगविज्ञाने भाषाभित्तिकप्रयोगिककौशलं नाम व्यावहारिकज्ञानं नितरां सन्निवेशिता । वर्णपदवाक्येषु व्यावहारिकशक्तिः सर्वदा अङ्गीक्रियते । यद्यपि पारमार्थिकतया तेषु काचित् नित्या सत्ता नोपलभ्यते । अत्र सन्दर्भे केचन सारभूता विन्दवः मया प्रदर्शिताः विद्यन्ते, यथा –

क) अष्टाध्याय्यां नित्यशब्दोपादानम्
ख) महाभाष्यदृष्ट्या शब्दनित्यत्वम्
ग) शेखरदृष्ट्या शब्दनित्यत्वम्
घ) भर्त्तृहरिमते शब्दनित्यत्वप्रसङ्गः
ङ) मञ्जुषादिशा शब्दनित्यत्वम्

### क) अष्टाध्याय्यां नित्यशब्दोपादानम्

पानिनिना अष्टाध्याय्याः प्रारम्भे शब्दनित्यत्वमभिलक्ष्य ”वृद्धिरादैच्ह्ल (१-१-१) इति सूत्रं प्रणीतम् । तत्र ॐकारवादस्तथा वृद्धिशब्दस्य माङ्गलिकत्वं प्रदर्शयितुमादौ मङ्गलमिति आचार्यः पाणिनिः सर्वादौ मङ्गलशब्दं व्यवहरति ।

यत्तु नित्यशब्दस्य वाचकत्वेनोदिष्टः परन्तु व्यावहारिकदशायां प्रायोगिकदशायां वा वक्ष्यमाणसूत्रैः नित्यशब्दस्य ग्रहणं शब्दानुशासनाय विहितमिति । यथा- १. अनित्यलोपसंपादानाय नित्यशब्दोपादानं यथा-

”नित्यं करोतेःह्ल (६-४-१०८)- करोतेः उत्तरस्य उकारप्रत्ययस्य वकारमकारादौ प्रत्यये परतः नित्यं लोपो भवति । कुर्वः, कुर्मः ।

**Corresponding Author:**
**सुलग्ना लेङ्का**
आचार्यद्वितीयवर्षम्, राष्ट्रियसंस्कृतसंस्थानम्
श्रीसदाशिवपरिसरः, पुरी, ओडिशा, भारत

२. प्रत्ययविधाने नित्यशब्दप्रयोगार्थम् –
"नित्यं कौटिल्ये गतौ॥ (३-१-२३)- गतिवचनाद् धातो: कौटिल्ये गम्यमाने नित्यं यङ् प्रत्ययो भवति । कुटिलं क्रामति चङ्क्रम्यते ।
३. समासे षष्ठीविधानस्य नित्यतायाम्-
"नित्यं क्रीडाजीविकयो:॥(२-२-१७)-तयोरर्थयोरेकेन नित्यं समस्यते । नखलेखक:, दन्तलेखक: इत्युदाहरणम्
४. नित्यसकारलोपनिमित्तम्-
" नित्यं ङित:॥ (३-४-९९)- ङितो लकारस्य य उत्तम:, तस्य नित्यं सकारस्य लोपो भवति । उपचाव, उपचाम इत्युदाहरणम् ।
५. छन्दसि स्त्रियां ङीष्प्रत्ययविधानस्य नित्यता, यथा-
" नित्यं छन्दसि॥ (४-१-४६)- वह्वादिभ्य: छन्दसि विषयो नित्यं स्त्रियां ङीष् प्रत्यय: भवति ।
६. विकल्पनिवृत्त्यर्थं प्रत्ययविधानस्य नित्यता, यथा-
"नित्यं पण: परिमाणे॥ (३-३-६६)- पण-व्यवहारे स्तुतौ च , अस्मात् धातो: नित्यम् अप् प्रत्यय: भवति । उदाहरणं यथा- परिमाणे, गम्यमाने ।
७. छन्दसि मन्त्रविषये आद्युदात्तस्य नित्यत्वं ,यथा-
"नित्यं मन्त्रे॥ (६-१-२१०)-जुष्ट अर्पित इत्येते शब्दरूपे मन्त्रविषये नित्यम् आद्युदात्ते भवत: । जुष्टं देवानाम् इत्युदाहरणम् ।
अनयारीत्या सूत्रान्तरेष्वपि प्रक्रियादशानिमित्तं नित्यशब्दस्य व्यवहार: पाणिनिना कृत: ।

**ख) महाभाष्यदृष्ट्या शब्दनित्यत्वम्**

महाभाष्यकारेण शब्दस्य नित्यता प्रतिपादनाय वार्त्तिकं समुपस्थापयति यथा-[४] "सिद्धे शब्दार्थसम्वन्धे ॥– तत्र शब्द: नित्य अथवा कार्यमिति संशये जाते उच्यते यत्- द्रव्यविधानं व्याडिरिति मतानुसारं शब्द: द्रव्यरूपम् अर्थात् कार्यरूपमस्ति, एवञ्च यदा शब्द: कार्यरूपमस्ति तदा व्याकरणमपेक्षितम् । यदा शब्द: नित्योऽस्ति तदा अपि व्याकरणमावश्यकम् । अत्र प्रश्न: जागर्त्ति यत्- शब्दं नित्यमथवा अनित्यं मत्वा व्याकरणं रचितवान् ? अत्र भाष्यकार: वार्त्तिकमुपस्थापयति यत्- सिद्धे शब्दार्थसम्वन्धे । अस्य वार्त्तिकस्य अयमाशय: यत्- शब्दस्तथा अर्थ इत्युभययो: सम्वन्ध: सिद्ध: नाम नित्य:, पाणिनि: शब्दार्थयो: सम्वन्धं नित्यं मत्वा शास्त्रं रचितवान् । अत: ज्ञायते यत्- आचार्य: शब्दार्थसम्वन्धानां स्त्रष्टा अथवा स्मर्त्ता ? अत्र प्रदीपकार: कैयट: कथयति - यदा जातिस्फोटलक्षण: शब्द: तदा स शब्द: नित्य:, यदा जातिस्फोटलक्षणशब्द: तदा स शब्द: कर्य: ।
अत्र वार्त्तिके 9सिद्ध" शब्दस्य कोऽर्थ: इति प्रश्ने उच्यते- सिद्धशब्द: नित्यपर्यायवाची अर्थात् यत् कूटस्थेषु नाम अविनाशीषु नित्यवत् निष्ठति स एव सिद्ध:, यथा लोके व्यवह्रियते सिद्धा द्यौ:, सिद्धा पृथिवी, सिद्ध: आकाश:, अत्र आक्षेपभाष्यं कथयति- सिद्धशब्दस्य कार्येष्वपि व्यवहारोऽस्ति यथा सिद्ध: ओदन:, सिद्ध: सूप:, सिद्धा यवागू । अत्र प्रश्न: स्यात्- सिद्धशब्दस्य कार्येषु व्यवहार: दृष्टत्वात् कथम् अयं सिद्ध: शब्द: नित्यपर्यायवाची ? अस्य प्रश्नस्य समाधानं भाष्यकार: वक्ष्यमाणरीत्या उपस्थापयति । अत्र प्रथमसमाधानं यत्- संग्रहग्रन्थे उक्तं- किं कार्य: शब्दार्थसिद्ध इति वचनात् शब्द: सिद्ध: नाम नित्य: । तत: द्वितीयसमाधानं भवति- एव पदेन निश्चयार्थस्य ज्ञानं भवति, यथा-
अपभक्ष:, वायुभक्ष: । अत्र अप् एव भक्षयति, वायुमेव भक्षयति इति एव शब्दप्रयोगात् शब्द: सिद्ध अर्थात् नित्य इति वुध्यते । तृतीयसमाधानं भवति – पूर्वपदलोप: । यदा एक शब्द अत्यन्तसिद्ध: यथा- देवदत्त: । अत्र केवलं दत्त शब्दोच्चारणे देवदत्तशब्दस्य वोध:, भामा इत्युक्ते सत्यभामाशब्दस्य वोध: ,यतोहि शब्द: सर्वदा सिद्ध: नाम नित्य: । चतुर्थसमाधानं भवति- व्याख्यानत: विशेषप्रतिपत्ति: न हि सन्देहादलक्षणम् अर्थात् सन्देहद्वारा कस्यचित् विषयस्य अलक्षणं न कर्त्तव्यं यतोहि व्याख्यनतो: ज्ञायते आचार्यप्रभृतिभि: नित्यशब्दस्यैव विवरणं साधितम् । अत्रोच्यते-मांगलिकाचार्यकात्यायन: शास्त्रस्य मंगलनिमित्तं सिद्धे शब्दार्थसम्वन्धे इति वार्त्तिकस्य आदौ मंगलवचकं सिद्धशब्दं प्रयुङ्क्ते, यतोहि- [५] "मंगलादीनि मंगलमध्यानि मंगलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्ति आयुष्मत् पुरुषाणि चाध्येतारश्च सिद्धार्था यथा स्यु:॥ ।। अत: सिद्धान्ते शब्द: नित्य, अर्थ नित्य:, तयो: शब्दार्थयो: सम्वन्धश्च नित्य इति समाहितम् ।

**ग) शेखरदृष्ट्या शब्दनित्यत्वम्**

शब्दनित्यत्ववोधकपाणिनीयव्याकरणस्य वेदाङ्गत्वं शेखरकारेण स्वीकृतम् । श्रुतिमूलकत्वात् सूत्राणाम् अदृष्टप्रयोजनमत्र अभीप्सितम् । अत्र शेखरकार: कथयति- वृद्धिसूत्रस्थे वर्णानाप्यनर्थकेन न भवितव्यम् इति भाष्यग्रन्थेऽनर्थकत्वम्, वोध्यार्थकत्वम्, वोध्यार्थराहित्यरूपमिति न निष्प्रयोजनस्वरूपानर्थक्येन तत्र तत्र प्रत्याख्यानपरभाष्यासङ्गति: । अत्र अयं भाव:- [६] "वृद्धिरादैच्॥ इति सूत्रे संज्ञाधिकाराभावे वृद्धि: संज्ञा, आदैच् संज्ञी इत्येवं निर्णयाभावेन सन्देहे वाक्यार्थवोधाभावात् सूत्रस्यानर्थक्यं प्रसज्येत ? अस्तु आनर्थक्यम्, लोकेऽपि अर्थवन्ति अनर्थकानि च वाक्यानि दृश्यन्ते ? शङ्कमिमां निराचिकीर्षुर्भाष्यकार आह- वर्णेनाप्यनर्थकेन न भवितव्यमित्यादि । तथा च पूर्वोत्तरोभयस्मिन्नपि पक्षे [७]"अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु॥ इत्यमरकोशदिशा अभिधेयवाची प्रकृतेऽर्थशब्दो न प्रयोजनवाची । एवञ्च अर्थरहितानि वचनानि यथा लोके तथाऽत्रापीति शंकाया: निरासाय भाष्यकृता एको वर्णोऽप्यनर्थकोऽत्र शास्त्रे नास्ति , सूत्रस्य तु आनर्थक्यस्य का चर्चेत्याशयेनोक्तम् । तथा च प्रत्याख्यानस्थलेऽपि वोध्यार्थराहित्यरूपमानर्थक्य नास्तीति ।
अत्र अभिप्रायस्तु वर्णानां वोध्यार्थराहित्याभावात् वर्णानाम् आनर्थक्यं नास्ति । वृद्धिरादैच् इति सूत्रे शब्दनित्यत्ववृता भाष्यकृता नित्यार्थमुद्दिश्य वर्णानाम् अदृष्टप्रयोजनं पर्यालोचितम् ।

**घ) भर्तृहरिमते शब्दनित्यत्वप्रसङ्ग**

भर्तृहरि: शब्दानामनित्यत्वे व्याकरणेन शब्दानुशासनस्य कर्तुमशक्यत्वमभिनवान् शब्दानामुत्पादनस्य सम्भवेनाव्यवस्थितत्वापातादत: शास्त्रव्यवस्थासिद्ध्यर्थं शब्दार्थसम्वन्धानां नित्यतां प्रमाणयन् शास्त्रेणास्य ग्रन्थस्य सम्वन्धार्थमुपोद्धातमारचयति -[८]

"नित्या: शब्दार्थसम्वन्धास्तत्राम्नाता महर्षिभि: ।
सूत्राणामनुतन्त्राणां भाष्याणाञ्च प्रणेतृभि:"।।

शब्दार्थसम्वन्धनां नित्यत्वमाम्नातमिति तत् प्रमाण्यात् शब्दार्थसम्वन्धनां नित्यत्वे न विप्रतिपत्तव्यं तद्वचनविरोधे तदनित्यत्वसाधकानुमानानां शब्दोऽनित्य: कृतकृत्वादित्यादीनामागमविरोधे नरकपालं शूचि प्राण्यङ्गत्वादित्यनुमानस्येव वाधितत्वेनोदेतुमशक्यत्वात् । एवञ्च व्यवस्थितसाधुभावेषु नित्येषु शब्देषु एक: शब्द: सम्यग्ज्ञात: शास्त्रान्वित: सुप्रयुक्त: स्वर्गे लोके च कामधुग्भवति इति श्रुत्या साधुत्वज्ञानपूर्वकशब्दप्रयोगे धर्मोत्पत्तिवोधनात् साधुत्वज्ञानाय शास्त्रप्रणयनमावश्यकमिति ।
अथ शब्दानुशासनम् इत्यनेन परम्पराप्रयोजनं वेदरक्षादिकं च भाष्यकृता उक्तं तत्र आसन्नं ब्रह्मण इत्यारभ्य परंब्रह्माधिगम्यते इत्यन्तेन अथ शब्दानुशासनम् इत्यारभ्य किं पुनर्नित्य: शब्द: आहोस्वित् कार्य: इत्यत: प्राक्तन उपोद्घातरूपो महाभाष्यग्रन्थस्तात्पर्यतो विवृत: सांप्रतं सिद्धे शब्दार्थसम्वन्धे इति प्रथमं वार्त्तकं व्याख्यातुमाह- नित्या: शब्दार्थसम्वन्धा इति ।

**ङ) मञ्जुषादिशा शब्दनित्यत्वम्**

मञ्जूषाकारेण शब्दनित्यत्वविवक्षया हरिकारिकां प्रस्तौति, यथा- [९]

"अनादिनिधनं ब्रह्म शब्दतत्वं यदक्षरम् ।
विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यत:" ।।

शब्दतत्वं ह्यनादिनिधनमाद्यन्तरहितमक्षरनिमित्तत्वादक्षर ब्रह्म एव एत: प्रत्यक् चैतन्ये निवेशितस्य परवोधार्थमभि- व्यक्ते रर्थभावेन जगत: प्रक्रिया विवर्त्तते तत्वादप्रच्युतमप्येकं भेदानुकारेण शक्त्यानेकरूपतां प्रतिपद्यते रज्जुरगवत् ।

मञ्जूषाकारदृष्ट्या स च यद्यप्यकोऽखण्डश्च तथापि पदं वाक्यं जपाकुसुमादिलौहित्यपीतत्वादिव्यञ्जको परागवशाल्लोहित:, पीत: स्फटिक इति भानवद् वर्णादिव्यङ्ग्यो वर्णरूप: पदरूपो वाक्यरूपश्च । तदुक्तं हरिणा-[१०]

"पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च ।
वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन"।।

यथा हि स्वच्छवर्ण: स्फटिकव्यञ्जकसंसर्गेण लोहितवत्पीतवद्वाऽवभासते यथा वा एकाकृति मुखं व्यञ्जकोपकरणवशाद् दीर्घं वर्तुलं वा दृश्यते तथैवाप्येकोऽपि स्फोटोऽखण्डोऽपि वर्णपदवाक्याधारेण तत्तत् स्फोटरूपेणावभासते ।

**उपसंहार**

परावागरूपस्य शब्दब्रह्मण: स्वरूपं सततं नित्य एक एव । पाणिनि-कात्यायन-पतञ्जलिरिति मुनित्रयेण यथा शब्दस्य नित्यतामाश्रित्य सूत्रवार्त्तिकभाष्यं प्रत्यपादि तथैव भट्टोजिदीक्षित-नागेशभट्ट-कौण्डभट्टप्रभृतिभि: वैयाकरणै-रपि नित्यत्वं पर्यालोचितम् । शब्दनित्यत्वोपादाने श्रुतिरपि प्रकटयति , यथा ऋग्वेदे -[११]

"चत्वारि वाक्ह्, निरुक्ते [१२]"चत्वारि श्रृङ्गा" ।

साधुत्वज्ञापकशास्त्रं व्याकरणं नित्यं लक्ष्यभूतं शब्दं समाश्रित्य प्रकृतिप्रत्ययादिज्ञानसहितं नित्यानां शबद्ानामन्वाख्यानं विदधाति । तदर्थं व्याकरणं वेदमूलकत्वात् साधुत्वविषयास्मृतिरूपेण भर्त्तृहरिणा प्रपञ्चितम्, यथा-

"साधुत्वज्ञानविषया सैषा व्याकरणस्मृति: ।
तस्मान्निवध्यते शिष्टै: साधुत्वविषया स्मृति:" ।।

इह जगति द्वौ शब्दात्मनौ । स्थानकरणाभ्यामविवृत्तो नित्य: , ताभ्यां विवृत्तस्त्वनित्य इति । कार्यो व्यावहारिको वैखरीरूप: येन सर्वोऽपि लोकव्यवहार: प्रवर्त्तते । नित्यस्तु शब्द: परावाग्रूप: सर्वस्य साध्यसाधनव्यवहारस्य पदपदार्थभेदव्यवहारस्य च कारणम् । कार्यस्तु शब्द: सर्वस्य व्यवहारस्य निमित्तकारणम् । अत्र साधुत्वं नित्यशब्दस्य परिचायकत्वं परिलक्ष्यते । शुक्लयजुर्वेदे कथितम्-[१३]

"दृष्ट्व रूपे व्याकरोत् सत्यानृते प्रजापति: ।
अश्रद्धामनृते दद्याच्छ्रद्धां सत्ये प्रजापति:" ।।

अत्र प्रजापतिर्वैयाकरण: शब्दोपादानकसृष्टिविधाता संश्लिष्टे सत्यानृते पृथक् कृत्य सत्ये परमार्थभूते वस्तुनि श्रद्धामसत्येऽनात्मनि अश्रद्धां कुर्यात् इत्यर्थवर्णनेन सत्यासत्यविवेचनलक्षणं दर्शनत्वं व्याकरणस्य लभ्यते एव ।

**पादटीका:**

१. वा.प.ब्र.का-१२३
२. ऋ.व
३. श.ब्रा
४. म.भा.वा
५. म.भा
६. ल.श.शे-पा.सू-१-१-१
७. अ.का
८. वा.प.ब्र.का-२३
९. वा.प.ब्र.का-१
१०. वा.प.ब्र.का-७३
११. ऋ.वे-१-१६४-४५
१२. नि-१३-२
१३. शु.य- १९-१७.